No. ४४०८

Title कुण्ड मण्डन विवरणम्

Author ०

Extent ३४ Age १८४६

Subject धर्मशास्त्रं

कुण्डमण्डनविवरणम्

५५०८

पुस्तकमिदं
स्वीन कैटलोग पुस्तके
न लब्धं

नं. ४००८

ष्टं पंचदर्शितं। ननु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुत्या सकलवैदिकधुरीणानामात्मज्ञानस्यैव परमपुरुषार्थापवर्गसु
खोपायात्मानात्मविचार एव श्रेयस्कर इति किमुत कर्मजितो लोकः क्षीयते इत्यादिश्रुत्या धूमार्चिरादिमार्गप्रदर्शनेन च क्षुद्रफलको यमारंभ इति चेदुच्य
ते येपि नित्यसुखाभिव्यक्तिं येपि दुःखध्वंसं वा अपि घानिवृत्तिं वा लिंगशरीरपलं वा अपवर्गमाहुस्तेषामपि शरीरपरिग्रहाभावे अवाद एव। एतद्विरूढ्या सक्रवात्स्या
यनस्य तेषु हर्षवर्धिकामिनीमीविमोक्ष एवापवर्ग इति तस्याः काममूलत्वेनाप्रामाण्यत्वेन निष्प्रयोजनाधिकरणन्यायेन श्रुत्यकल्पनात्। अतः सर्ववा
दिसंमतमिदमेवापवर्गलक्षणं कर्कीर्यं रूढात्तत्र शुभाशुभकर्मोपभोगनिमित्तेनैरंतर्येण प्राणिनां शरीरपरिग्रहाभावो ऽपवर्ग इति अयं चापवर्गो नि
बंधकाम्यवर्जनान्नित्यानुष्ठानात् आजायते नतरथा। ननु बिंबविदमयुक्तं कर्मणां तावत् कर्मणा चितः लोक इति फलांतरे विधानेन मरणकांक्षत्वात्तस्तु
तएतरेव प्रवव्राजिनो लोकमीप्संतः प्रव्रजंति न कर्मणा न प्रजया नास्त्यकृतः कृतेनेत्यादिश्रुति सहस्रैर्मुमुक्षोः कर्मणां त्यागविधानात्। अतो न
कर्मसाध्यत्वमिति चेत्सत्यं। तथापि कर्मणां विविदिषावाक्येन मोक्षोपायज्ञानात्। तथाहि यथाश्वमेधेन जिगमिषोस्तत्र गमनफले ग्रामसंयोगे ऽश्वो
पादानं तथा तमेतं वेदानुवचनेन विविदिषंति यज्ञेन दानेन तपसा ऽनाशकेनेनापवर्गोद्देशेन तृतीयाश्रुत्या कर्मणां संयोगपृथक्त्वाधिकरणन्याये
नत्वात् ज्ञानप्रयोगांतरानुपादानात् मुक्तेः कर्मसाध्यत्वं। न च यच्छ्रुत्या इच्छावेदनयोरन्यतरस्याभावात्तस्यान्न मुक्तेरिति वाच्यं तयोः पुरुषार्थत्वा
त्। विधिश्रुत्या पुरुषार्थस्यैव भावात्वाद् श्रुत्यपेक्षया तस्या बलीयस्त्वात् तत्र कथं कर्मणां मोक्षः साध्यत इत्यपेक्षायां पूर्वोक्तोपभोगाभावद्वारे
णेति संक्षेपसंग्रहः। अस्ति चात्मज्ञानस्यापि परंपरयोपयोगः। अस्तु वा आत्मज्ञानस्यापि मुक्तिव्यापारत्वं व्यापारस्तु न ज्ञानमतेन्यति तज्जन्यजनकीभावः। त
च नित्यकर्मणो वेति संक्षेपः। ननु तथापि धर्मपुराणान्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश इत्यादिवाक्यैः प्रमाण
त्वेनोपक्रान्तानां सदाचारसहितानामेषामभ्यसनीयत्वे तैरेव प्रतिपादितानामेव कर्मणामनुष्ठेयता प्रसिद्धेः तद्भिन्नश्रव्यादिग्रंथानामभिधानस्य तध
र्मे प्रामाण्यमिति चेन्न। इदानीतनानामपि माधवप्रभृतीनां मन्वादिवद्देशानामेव धर्मे प्रामाण्यमभ्युपगन्तृणामन्यत्वेशाकावेवैलक्षिण्यतपातक्षपणी
तानां श्रुतिस्मृत्यविरुद्धानां कालमाधवादिनिबंधानां व्याख्याग्रंथानां चक्रचिरकोत्तरितं घृतरितं च सदाचाराधिकरणन्यायेन धर्मे प्रामाण्यं निर्विवादं।

२

आचारस्यैकस्य तत्तिं ज्ञात्वा स्मृते श्रुतिकल्पनमित्युक्तेः सदाचारस्यापि प्रामाण्यत्वस्वीकारात् किमुत तत्प्रणीतग्रन्थानां। इत्थं ते हि प्राक्तनस्यास्य कल्पसूत्रप्रणीतः स
वोप्यर्थः तेन कल्पोपजीव्यप्रामाण्यस्यास्य क्वचित्स्पष्टस्पष्टत्वं सर्वेदमूलत्वं क्वचित्स्मृत्यन्तरस्य वेदमूलत्वं चावश्यमभ्युपेयं। नैवमस्य प्रणयनं तथापि निरर्थकमेवेति वा
च्यं अत्र कारिकाकृतो नाभिवेहापि नानाशाखासमधिगम्यानेककल्पसूत्रोपायस्थितानेककर्मोपसंहृत्य एकत्र हि कल्पानामंगप्रधानकर्मणां तत्तद्धर्माणां च विप्रकीर्णत्वा
ल्लसपुरुषैरल्पमत्यासुखेन वोद्धुमशक्यत्वात् सरमकरणाय सर्वसंग्रहाख्यीयमारंभः स्यादित्यत। ननु स्वाध्यायविधुसापि नाध्ययनविधेरुपादेयत्वाध्ययगतस्यैक
त्वस्य विवक्षितत्वेन स्वपूर्वजपरिगृहीतस्य वेदावयवभूतैकशाखाध्यायस्याध्ययनशक्तौ पारं येयस्यैकवेदस्य द्वयोस्त्रयाणां वा प्रत्येकं एकैकशाखाध्ययनविषयत्वेन
प्रतिज्ञातानत्वमाः। एवं चेसति अध्ययनस्य दृष्टार्थता स्ववेदावयवभूतैकशाखाध्यायमेवस्वाध्यायशक्तौ पारं पर्यस्यैकवेदं गच्छते। अन्यथा दृष्टार्थताप्रसंगः स्यात्। तथा
कल्पसूत्राणामपि वेदांगत्वेनाध्ययनं स्वाध्यायवद्व्यवच्छितः एवं चानेकसूत्रार्थसंग्रहः किंफलायेति चेत्सत्यं अधिकारिपरत्वे नात्रवैषम्यात्। न चापसंतवद्वनितार्थ
कारिकास्थितिकस्समारणत्वात्कथमेतदिति वाच्यं। इत्यधिकरणन्यायेनास्यापि स्तुवचत्वात्। तदुक्तं। नत्सिद्धिर्जातिसारूप्यप्रशंसालिंगभमेतः। षड्भिः सर्वत्र शब्दा
नां गौणी वृत्तिः प्रकल्प्यत इति। यद्वा सांकांस्यस्यान्यतः परस्ताय शाखांतराधिकरणन्यायमूलकोयं संग्रह इति॥१॥ अवांतरप्रकरणान्याह तत्रेति। अधि

तत्राधिकारकालादिप्रथमं प्रतिपाद्यते सूत्रांतरमतं वक्ष्ये सोपयोजं क्वचित्क्वचित् प्रसंगादग्निहोत्रेष्टिपश्वाधानोपयोगियत् ६
तत्रापि लेशतः किंचित्प्रवक्ष्ये तत्र तत्र च ३ अधिकारास्त्रिधा नित्यकाम्यनैमित्तिकत्वतः तेच श्रौतार्थवादोत्थकल्प्यत्वेन त्रिधा पुनः ४

कारो नाम कर्मजन्यफलभोक्तृत्वं। अधिफले मस्तः उपरि क्रियते ऽनेनेत्यधिकार इति वा समस्ततः। तत्र सोमप्रयोगे प्रथमं अधिकारः। कस्मिन्कर्मणि कस्या
धिकार इति निरूपणं। कालो वसंतादिः स च कालदोषोधिकारस्य हानिं वितनुते क्वचित्स्यादिना वक्ष्यति। आदिपदात्पत्यादिनिरूपणं। प्रथमं प्रथ
रिच्छेद इति यावत् प्रतिपाद्यते ऽच्यते। तथा सोमयागप्रतिसूत्रांतरमतं सूत्रांतराणि बोधायनादीनि तेषां मतेन तदुक्तार्थं क्वचित्क्वचित्सोकांक्षादिस्थले
प्रतिपाद्यते वीप्साकरणमनियमप्रदर्शनार्थं। २। प्रतिज्ञापो माह। प्रसंगादिति प्रसंगात् प्रसंगसंगत्या अग्निहोत्रेतन्नामकं कर्म होमविशेषः। इष्टिर्द
र्शपूर्णमासाग्रयणेष्ट्यादिः पशुरग्नीषोमीयादिः। आधानं। एतेषु उपयोगि यत् देशकालद्रव्यप्रतिनिध्यादि तत्प्रवक्ष्ये एतदृषिन साकल्येनेत्याह तत्रापीति
लेशतः संक्षेपेण सार्वविभक्तिकस्तसिः। नानुक्रमेणापीत्याह। तत्र तत्रेति तस्मिंस्तस्मिन्प्रसंगे॥३॥ तत्र प्रथमोद्दिष्टमधिकारं दर्शयति॥ अधिकार इति॥ क
र्मणां त्रैविध्यादधिकारस्यापि त्रैविध्यमिति भावः। नित्याग्निहोत्रलक्षणानि वक्ष्यं तेपुनस्ते अधिकाराः श्रौतार्थवादकल्प्यत्वेन त्रिविधा भवंति। एतदुक्तं
भवति। सोयं चरहनि वपेदित्यादिः श्रौताधिकारविधिः। प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीत्यादिरर्थवादिकेधिकारः। विश्वजिता यजेतेत्यादौ कल्प्याधिकार

रा०म०
२

अथ पितृयज्ञेऽधिकारचिंतां तदर्थमिदं विचार्यते। किं पितृयज्ञो दर्शांग उत नेति। तत्र मतभेदेनोभयमपि सिद्धं तत्॥ पितृयज्ञस्य चेति। पितृयज्ञ इति अस्य परा स्वाङ्कर्मनामा साङ्गत्वं दर्शांगत्वं कात्या-
यनोपि। प्रकरणात् काललिंगानुग्रहवचनानाहिताग्नेरपि पितृभ्योऽनुगमितिः एवं पुस्तकसूत्रेणानेनांगत्वमाह श्रुतेरितिहितोपंचमीयं। एवं पितृभ्यो निष्क्रीय प्रातर्देवेभ्यः प्रतनुत इति श्रु-
तिः। कात्यायनस्तु अंगत्वाऽसमभिव्याहारादिति सिद्धं तमाह॥ ५॥ एवमंगत्वपक्षे आधानं पितृयज्ञयोरधिकारस्याधर्म्यार्थमाह आधानमिति। आधानं नित्यमिति याज्ञिकसिद्धान्तः
हविर्यज्ञसंस्थासु पाठात्तु रूपायपयोगित्वात्। चिंतायां याजनेन तु यथाधिकारविनियोगस्याय उनेति नागहीनानामपि अधिकार इति। एवमाधानपितृयज्ञयोर्नित्याधिकारं मुक्त्वा मतांतरेण
काम्याधिकारमाह। केचिदिति। वार्तिकमते पिंडपितृयज्ञस्यानंगत्वपक्षेण काम्यत्वं ६ मतांतरेण काम्यत्वमाह। आधानस्यापीति॥ वोधायनीये आधानस्य काम्यत्वं ते तेनोभ-
योः काम्याधिकारेऽप्यस्य च ७ अथेदं अपते पौर्णमस्यां पौर्णमास्या यजेतेत्यादि। वसंते वसंते ज्योतिषा यजेतेति च। तत्र केषुचिन्नित्यकाम्याधिकारः। केषुचित् काम्यनैमि-
त्तिकाधिकारः केषुचिन्नित्याधिकार इत्याह। द्विप्रकारा इति द्वाभ्यां। नित्यकाम्यभेदेन द्वौ प्रकारौ। अन्यान्याधानभिन्नानि कानिचित्। नसर्वाणि। आग्रयणादीनां नैमित्ति-

पितृयज्ञस्य चांगत्वमापस्तंबेन दूषितं साधितं तु भरद्वाजसूत्रभाष्यकृता श्रुतेः ५ आधानं नित्यमेवेष्टं पितृयज्ञोपि तादृशः केचिन्नी
मांसकैः काम्यः पितृयज्ञो निरूपितः ६ आधानस्यापि काम्यत्वं बोधायनमतादिह चेत सर्वकामार्थमाधानमिति तेन निरूपितं ७ द्विप्रकाराधि
काराणि कर्माण्यन्यानि कानिचित् ज्योतिष्टोमो निरूढपशुबन्धः सौत्रामणी तथा ८ चातुर्मास्यानि दर्शश्च पौर्णमासोऽग्निहोत्रकं वाजपेय
इत्येते स्वनित्याः काम्या इति द्विधा ९ ज्योतिष्टोमस्य चैवाग्निष्टोमसंस्थस्य नित्यता अथ वोक्थ्यादिसंस्थस्यापीष्टं त्वन्ये तु नित्यतां १०
ज्योतिष्टोमस्य नित्यत्वादावृत्तिः प्रतिवत्सरं अथवा सकृदेवस्यान्नित्याधानकमिवेत ११ ॥ ॥ श्रीकृष्णायनमः ॥ ॥

ककाम्यत्वस्यवक्ष्यमाणत्वात् तान्येवाह ज्योतिष्टोम इति। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत स्वाराज्यकामो वाजपेयेन यजेतेत्यादि तत्तद्वाक्येषु फलश्रवणा-
दिति भावः ९ ज्योतिष्टोमे नित्यकाम्यत्वे विशेषमाह। ज्योतिष्टोमस्य चेति। अग्निष्टोमः सामविशेषः समाप्तौ यस्य सोऽग्निष्टोमसंस्थो ज्योतिष्टोमः स नित्यः
अन्येत्वग्निष्टोमादयो नित्याः काम्या इति यावत्। मतांतराश्रयेणाह। अथवेति। उक्थ्यादीनामपि संस्थासु पाठान्नित्यतेति भावः १० वसंते वसंते तिवीप्सा श्रव(ण)
नित्यत्व निमित्तकत्वाच्च ज्योतिष्टोमस्य नित्यत्वं कामनाधीनत्वाच्च काम्यत्वं तत्र नित्यत्वे सोमस्यावृत्तिः सकृत्करणं चेति मतभेदेन पक्षद्वयमाह॥ ज्योतिष्टोम-
स्येति। प्रतिवत्सरं वसंते वसंते प्राप्तव्यमित्यर्थः। अथवा शब्दो विकल्पे। वीप्सा आदरार्था पुरुषसंस्कारत्वेन गौतमस्मृतौ संस्थानां पाठात्तेन नित्यानां सकृदेवा-
नुष्ठानं श्रौतेनाह आधानेति ११ ॥ ॥ ॥

२

काम्येनित्यसिद्धिमाह। काम्यबुध्येति। स्पष्टं १२ क्वचित्कामनिमित्ताभ्यामधिकारस्तत्रोदाहरणमाह। क्वचिदिति। अत्र शरत्कालीनत्वबसन्तागमो निमित्तं तत्र दर्शनं कामः
एवं एवत्रोत्पत्तिर्निमित्तं। एतत्वादिकं कामना। तत्र सकृदनुष्ठानेनोभयसिद्धिः १३ अत्र नैमित्तिकाधिरएवेति एकदेशिमतमाह। केचिदिति। एतत्वान्नवामी आनुषंगिकेफ
लं तत्तु कामनां विनैव सं भवति १४ उद्भिदादिष्वधिकारस्वरूपमाह। अन्य इति उक्तादिभ्योऽन्ये विश्वजिदादयः। सत्रो यागुर्योशात्कौ विश्वजितातिशत्रेशोत्या
दिवाक्यै नैमित्तिकत्वं। अपरे त्वेनयागादयः उपसंहरति इतीति १५ अस्मिन्नर्थे भरद्वाजमतमाह। काम्येति। अशेषाणामिस शेषतेः वैकृतानां विश्वजिदादीनां सं
र्वेषां यागानां नित्यकाम्यत्वं भारद्वाजसूत्राणां अधिकारमखारंरूपनाभिनारयस्तान्नजोयित्वात्तेषां नैमित्तिकत्वमेवेतिभावः। निमित्तमधिकारकमिस्तु

[illegible] काम्यबुध्यापदेत्तानि कर्माणि कुरुते तदा तेनैव नित्यसिद्धिः स्यान्न निस्यार्थापृथक्क्रिया १२ क्वचित्कामनिमित्ता
भ्यां सहिताभ्यामधिक्रिया यथैवाग्रयणा यागे यथाजातेष्टिकर्मणि १३ केचिन्निमित्तमात्रेणोवाधिकारमिहाब्रुवन् एततोऽस्य न्नवाती काम्याभा
वेपिसिध्यते: १४ अन्ये नैमित्तिकाः केचिद्यागाः काम्यास्तथापरे कामनैमित्तिकाः केचिदिति त्रैधं प्रकीर्तितं १५ काम्यता पिहिते मानां विहि
तानामशेषतः नित्यतोक्ता भरद्वाजेनाधिकारमखेविना १६ जायापुरुषसंबंधि निमित्तमधिकारकृत् जीवनादिय थाहि मेशे हदाहा
दियायथा १७ क्वचिदन्यतरस्थेन निमित्तेनोभयोरपि साधारणोधिकारः स्याद्भार्यातिक्रमणेष्टिवत् १८ क्वचिदन्यतरस्थेवाद्वयस्थेवाधिकार
कं यथा मांसाशनेवाक्कर्मणपन्नतमापणे १९ क्वचित्तविकृतत्तसैवचाधिकारोत्तरंभवेत् यथा गोदोहनाद्येषु पशुकामोऽधिकारभाक् २०

तत्रोभयनिष्ठं (१६) अन्यतरनिष्ठं वोभयोरप्यधिकारं जनयतीत्याह जायेति। उभयसंबंधियावज्जीवनं होमाधिकारनिमित्तं तेनैकतरमृतेनाधिकारः। यदा त्व
ग्नेः सेतितत्तदात्तदाहुरपत्नीकोप्यग्निहोत्रमाहरेदिति वचनादग्निहोत्रेऽधिकारः। न तु दर्शपूर्णमासादौ तथा चैवहोरणमावादिति तत्र रले। अन्ये दर्शपूर्णमा
साग्रयणहोमनैमित्तिकेष्टिष्वपि अपत्नीकस्याधिकार इत्याहुः। गेहदाहेपि उभयनिमित्तो पाणिग्रहाद्विसहस्तेकर्मद्रव्यपरिग्रहहेतुचेतिस्मृतेः १७ अन
तरस्थोदाहरणमाह। क्वचिदिति। भार्यासंक्रमेष्टिराहिताग्नेर्द्वितीयपाणिग्रहणोत्तरमाम्नाता इष्टिः। अत्र यद्गतमेव निमित्तमुभयाधिकारकं १८ क्वचिदेक
स्थं द्वयस्थं वा अधिकारकमुदाहरति। क्वचिदिति। मांसाशनादिद्वयस्थमेकस्थं वाव्रात पतिव्रातमस्यापाः प्रयोजनीया इतिभावः १९ प्रधानकर्मणि अधिक
तस्यापि गुणकर्मण्यधिकारोत्तरंभवतीत्याह। क्वचिदिति। गोदोहनेन पशुकामः प्रणयेदिति वचनात् २० ॥ ६॥

रा०म० २

त्रेषु निषेधवाक्येषु निवृत्तेरेव फलत्वात्तस्याश्च तस्याश्च प्रवृत्तं प्रत्येव समार्थत्वात्तस्य वरणगतः शास्त्रतो वा भवति। अतस्तत्प्रत्येव निषेधशास्त्रमधिकारः कुर्वति। न सर्वो
नित्याह। निषेध्येष्विति। विहत्वे चाधिकारितावच्छेदकमिति वक्ष्यति। दर्विहोमादौ मंत्राभावाद्विद्वत्वमव्याप्यमित्यतस्तस्मात्तदर्थमाह मंत्रश्चान्येति २१ यावज्जीवमग्निहोत्रं जु
होति सायं जुहोति अशुचिना कर्म कर्तव्यमुपवासे व्रतावच्छेदकं छेनकर्तव्यमित्यादिवाक्यैः कालशौचादिमज्जीवनेन निमित्तेनाधिकारकमित्याह। होमादाविति। अग्नि
दिपराद्धर्शपूर्णमासादि। द्वितीयादिपदादभुक्तत्वादि। उपसंहरति अग्निहोत्रादिकमिति। अकाले कृतमकृतमिति न्यायेन सिद्धं अकाले कृतस्य पुनः करणं
२२ अशुचित्वादि कृते संदेहस्तदर्थमतां तरेणाभिप्रायेण स्वयं दृष्टमनुपपन्नस्मृति। अज्ञानादिति। अशुचिधनेन ना कर्मि ग त्माधनं ज्ञापाशुद्धं यस्य च तु दृष्टयमि
तिस्मरणात्। चोदितद्रव्यस्ये वाशुचित्वमिति वक्ष्यति। नावृत्तये दिति। कृतस्य पुनः करणं नास्तीति वचनात्। तथा च निदानसूत्रे। अंगमपरिसमाप्ते प्रधाने कृ

निषेध्येषु प्रवृत्तः सन्निषेध्येष्वविकारवान् मंत्रश्चान्येपि भावार्थे विद्वानेवाधिकारवान् २१ होमादौ कालशौचादिमन्निमित्तं तु जीवनं अग्नि
होत्रादिकं तस्मात्काले शौचे विधीयते २२ अज्ञानादशुचिः कर्म कृत्वा शुचिधनेन वा नावर्तयेत्पुनः कर्म प्रायश्चित्तेन शुध्यति २३ अपरेत्व
शुचिद्रव्यकर्त्रादिकृतकर्मणः आवृत्तिः सर्वथा कार्येत्येवमाहुर्विपश्चितः २४ दीक्षितोऽङ्गमतेष्टिहोमपश्वादिनाचरेत् होमेष्टिपशु
मध्ये तु काम्यकर्मान्तरं न च २५ नित्यं नैमित्तिकं तत्र प्राप्तकालं समाचरेत् अल्पतंत्रं महातंत्रे यदि सन्निपतेत्क्वचित् तन्मध्ये तन्न कर्तव्यं
तत्समाप्य तदाचरेत् २६ केचित्त्विष्टिमध्ये न्यस्य श्विष्ट्यादि समाप्यते न कार्यं तत्समाप्येव पौर्णमास्यं कार्यमिष्यते २७ श्रीरामः

यतोऽपरिसमाप्ते तु न कर्तव्यमित्यादि २३ पक्षान्तरमाह। अपरे त्विति। तस्यार्थः। अत्राहुः परस्यां व्याख्यायां ज्ञानाज्ञानमवस्थाभेदेन विकल्पमाहुः। तथा चाज्ञा
नादशुचिना कर्मणि ज्ञाने नोक्तं प्रायश्चित्तमात्रं नावृत्तिः ज्ञानात्करणे तु पुनरावृत्तिरिति २४ प्रसंगाद्दीक्षितस्यानधिकारमाह। दीक्षित इति। दीक्षितो न जु
होतीति वाक्यात्पुरुषार्थमतं होमादीनां बाधः क्रियते। नत्वंगमतहोमप्रायश्चित्तेष्ट्यादीनां बाधः। अथ प्रवृत्ते निपतेद्येषु विशेषादन्यधिकरणान्यायेनाहहो
म इति २५ नित्यमिति। कर्मान्तरनिषेधे न तु ग्रहणान्तरं तु भवति प्राप्तकालमिति पश्चिमेष्ट्यादौ क्रियमाणे चैवात्मायं काले समागते मध्ये सायंहोमं समाप्यैव पूर्वे
प्रवृत्तसमाप्तिः। एवमग्निहोत्रार्थमुद्धरणे कृते संध्याकालप्राप्तौ संध्यां कृत्वैव होमः। तत्र विशेषमाह। अल्पतंत्र इति। यथा होमे क्रियमाणे दर्शभ्रान्तरागं
मने होमं समाप्यैवेष्टिः। क्षेडकेवशाहादीनां चांतरागमने त्वल्पतंत्रे प्रायश्चित्तमुदकधारारूपं कृत्वेवागत्रे कर्मण्यधिकार इति भावः। एतदुक्तं भवति प्रवृत्ते कर्मणि नि
त्यं नैमित्तिकं वा कर्मान्तरं अल्पतंत्रं समानतंत्रं वा पलतिलहोतरकर्मीषिकारार्थवादरायणोन्यायं वाधित्वागन्तुके कृत्वैव शेषस्य करणं महातंत्र पाते तु अंगांगे प्रधा

४

कृतप्रकृतिपागत्वं विकृतिष्वधिकारप्रयोजकमित्याह प्रयुक्ते इति दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत एष वाव प्रथमो यज्ञो यज्ञानामित्यादिवचनात् एकदेशिमतमाह नायमिति अकृतसोमस्यापि राजादिकं अकृतदर्शपूर्णमासस्यापि पर्जन्यादिकामनायां कारीर्यादिकं भवतीति अपरामारव्याम् अशोमयाजिनोप्यमीषोमीयस्य पुरोडाशस्य एवाधिकारः

५

शेमलद्रूपेण विकल्पितादृति॥ २८ एवं हि श्रूयते पुत्रे जाते वैश्वानरं द्वादशकपालं निर्वपेदिति तत्र संशयः अनेकभार्यस्यैकस्यामपि पुत्रोत्पत्तौ एकस्या एवाधिकारः उत सर्वासामप्यधिकारः तत्र एकस्या व्रतलोपे निमित्तमेकस्या व्रातपतीति न्यायेन प्राप्तं पूर्वपक्षं निराकरोति वह्वी नामिति एकपत्नीनामित्यवधारणी २९ ननु भ्रातॄणामेकजातानां यद्येकः पुत्रवान् भवेत् सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् इति मनूक्तेरेकस्य भ्रातुः पुत्रजनने सर्वेषामपि अधिकारो भवतीति संदेहे सिद्धान्तमाह भ्रातॄणामिति न तु स्मृतौ विशेषणाश्रवणात् पुत्रशब्दस्य चापत्यवाचकत्वे न पुमान् पुत्रो जायते इत्यत्र दृष्टत्वात् क्षेत्रजासु उत्पन्नो कन्याजनने चेष्टिः स्यान्न वेति संदेहे सिद्धान्तमाह क्षेत्रजादीति सर्व ३१ प्रायश्चित्तसमुत्पन्न यागार्थमाह यमाविति महद्देवताकं भूतरुद्रस्यैको यागः ३२ यम

प्रयुक्तप्रकृतेरेवाविकृताववधिकारिता नायं नियम इत्यन्ये यथाकामं प्रयुञ्जते २८ वह्वीनामेकस्याः पुत्रजन्मनि सर्वासां तेन जाते न जातिष्वा-

वधिकारिता २९ भ्रातॄणां यद्यनेकेषामेकस्याप्यजायते सुतः स एवैकोधिकारी स्यात् ज्ञातिष्वावितरेन तु ३० क्षेत्रजादिसुतोत्पत्तौ पुत्रिकातनये

द्वये दुहितुर्जनने वापि न जातेष्टिर्विधीयते ३१ यमौ जातौ पुमान् सोचेत् यो रेको पि वा पुमान् कलावैश्वानरीकुर्यान्माहृतीमिष्टिमप्य-

थ ३२ मातृत्येकैव मरणे स्त्रीत्वे वा पमयोर्द्वयोः पुमान् न्यतरः सोपि मृतस्तत्रापि सैव हि ३३ एवमुच्चावचेष्वेते ष्वधिकारे प्रयोगिषु पु-

नः संक्षेपतः सोमस्याधिकारी निरूप्यते ३४ आहिताग्निः शुचिः शक्तः सम्यग्दृष्टपतितो द्विजः स्वर्गकामयमानोन्यथा किंचिद्रूपफलान्तरं ३५

योभेदेन विशेषमाह मातृत्येति अधिकारार्थं यमयोरित्यधिकारः एकैकमातृती न जनननिमित्तकजातेष्टिः एकलिंगयोर्भिन्नलिंगयोर्वा यमा-
प्रसयोर्मरणे केवलोमाहृतेष्टिरित्यर्थः ३३ एवं साधारणमधिकारं निरूप्य विशेषाधिकारार्थं प्रतिज्ञापयति एवमिति उच्चावचसाधारणा अग्नि-
होत्रादिषु अधिकारप्रयोगिनः अवचा साधारणाः यथैकस्याः पुत्रोत्पत्तौ सर्वासां तेषामधिकारप्रयोगिनस्तेषु अधिकारप्रयोगिषु अधिकारे फलभुक्तौ
उपयोगो येषां तेषु प्रसक्तानुप्रसक्तत्वेन अतः पुनः प्रकृतमेव संक्षेपेण सोमाधिकारिणं निरूपयिष्यामः संक्षेपग्रहणाच्च यानि अधिकारविशेषणानि नो-
क्तानि तानि उपलक्षणेन ज्ञातव्यानीत्यभिप्रायः यथा पविपाणपादि॥३४ तत्र सोमेन्याधिकारि विशेषणान्याह आहिताग्निरिति सिद्धाग्निमन्तमेव
वैकृतं नाप्रकृते तेन ततः प्राक् एवं शुचित्वं शक्तत्वं सम्यग्दृष्टत्वं अपतितत्वं द्विजत्वं चाधिकारितावच्छेदकं अभ्युद्याह ते जस्वा मित्यादिवचनात् ब्राह्मणराजन्यवै-
श्यानां श्रुतेरितिकात्यायनोक्तेर्द्विजानामेवाधिकारः स्वर्गकामत्वमप्यधिकारतावच्छेदकं ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवचनात् यत्किंचित्कामनावत्त्व

४

ननु फलसमुच्चये सति अनेकफलोद्देशेन सकृत्प्रयोगः तत्प्रतिकाममावृत्तिरिति तत्र पूर्वपक्षमेव सिद्धांतत्वेन स्वीकरोति। अन्यदिति। स्वर्गादन्यत् पुत्रादि स्वर्गं वा केव-
लं कामयमानोऽधिकृतो भवतीत्यर्थः ३६ तेषां समुच्चितं स्वर्गपुत्रपश्वादि सकलं फलं युगपत्कामनावाननधिकारी पर्यायेणान्यपूर्वपक्षसिद्धांतः। मित्रविंदाश्री
राष्ट्रमित्रायुष्कामस्येत्यादावप्येवं। एवं सोमस्य काम्यत्वमुक्त्वा नित्यनैमित्तिकत्वमाह। समुच्चितमिति। कामनाभाववतोऽप्यधिकारः विधेर्मीमांसकोक्तानि इत्यर्थमा-
ह यजनस्येति। पुनः पापं एनो पातकं दुरितस्य क्षयस्यात्यंतिकस्यातिमान दुरितप्रतिबंधस्य वा भावमत्त्वप्रयुक्तं भवति। वसंते वसंत इति श्रवणाद्वसंते निमित्ते ज्योतिष्टोम-
स्य विधानाद्वसंतकालनिमित्तमप्यधिकारितावच्छेदकं ३७ मतांतरमुपन्यस्यति। पद इति। वीप्साश्रवणाद्वसंतकालीनजीवनमप्यधिकारितावच्छेदकमि-
ति भावः। अपवर्गेच्छुत्वमप्यधिकारिविशेषणमाह। सोमेनेति। ब्रह्मविद्यासाधनत्वेन मोक्षसाधनं कर्मेशाः स्मरंति श्रीभगवानर्जुनं प्रति। तद्यथा कर्मणा शु-
द्धहृदयो मद्बुद्धिमुपैष्यति। कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादि बहुस्मृतिर्विविदिषंति यज्ञेनेति श्रुतौ यायान्यत्रापि च स्वर्गकामयमान इत्यारभ्य यानि विशेषणा-

अन्यत्कामयमानोपि स स्वर्गं वापि केवलं ३६ समुच्चितं वा युगपत्स्वर्गादि सकलं फलं निःकामोप्यनघो भीतो वसंताद्यनिमित्तवान् ३७ यद्वा वसंतकालादिजीवनाख्यनिमित्तवान् सोमेन यजते ब्र-
ह्मविद्याविशेषतयाथवा ३८ अधिकारदशाप्राप्तपुरुषांतरवर्जितः ३९ कर्तृत्वस्थानेष्वेवं सप्तमारोपितिमिः स्वाध्यायविधिसंसिद्धकृत्स्नवेदार्थदृक्तुः ३९ यद्वाध्ययनसंसिद्धानुष्ठेयमरवमात्रवि-
त् ४० यद्वाध्ययनसंसिद्धविशेषनरहितोपि सन् मातीधिकियाप्यन्याभर्त्यज्ञादिदर्शनात् ४१

नियया समवयर्यायोधावि ३८ पवित्रादिदोषनिवृत्त्यर्थमधिकारिविशेषणांतरं सर्वसाधारणमाह। अधिकारेति। अधिकारदशायां प्राप्तपुरुषांतरं तेन
वर्जितो हीनः। सत्यधिकारेपि तादृशेप्सोरेक्षुनीनाने अधिकारो नास्तीति तदभाववत्त्वमधिकारितावच्छेदकमिति भावः ३८ पाठं विद्वत्त्वमप्यधिकारितावच्छेदक-
मित्यत्र पक्षत्रयमाह। कर्तृत्वस्थेति। वस्यमाणेत्युपरम्यन्यैः कर्तृत्वस्थाध्यायदशायां गतैर्विद्यमानैस्त्रिभिर्विशेषणैर्युक्तोधिकारी तान्येवाह। स्वाध्यायेत्यादिना स्वा-
ध्यायोध्येतव्य इति विधिचोदितस्य षडंगस्य सकलस्य शाखापरपर्यायवेदाध्ययनसंसिद्धार्थज्ञानवत्त्वमप्यधिकारितावच्छेदकमिति भावः। तत्र विधिवाक्यानां विधायकत्वे-
नार्थवादानां स्तावकत्वेन मंत्राणां स्मारकत्वेन नामधेयानां परिच्छेदकत्वेन धर्मे प्रामाण्यमिति मन्यन्यत्राविस्तरः। तत्रार्थप्रयनद्वारा न तु च्चारणमात्रेण प्रा-
माण्यम् एवं चाध्ययने दृष्टार्थद्वितीयं पक्षमाह। यद्वेति। स्वाध्यायविध्युत्यादितानुष्ठेयमात्रोपयोगिस्वाध्यायार्थज्ञानवत्त्वमाधिकारित्वमिति भावः
तेनाध्ययनदृष्टार्थत्वे युक्ततरं भवतीत्यभिप्रायः। ४०। तृतीयं पक्षमाह। यद्वेति। नादृशवेदाध्ययनवत्त्वमेवाधिकारिविशेषणं नार्थज्ञानवत्त्वमेव:
तेनाभावकर्मणोऽधिकारो नास्तीति वक्तुं न युक्तमिति भावः। तदर्थं समतिमपि दर्शयति। मर्त्ययज्ञादीनां दर्शनात्कृतनिर्वंधेषु भाष्यरूपेषु दृष्ट्वा
दित्यर्थः। सत्यर्थज्ञाने सफलसंसिद्धिः। ननु अर्थप्रत्यायनद्वारा मंत्राणां दृष्टार्थत्वे स्वीकुर्मः। तदभावे तु सिद्धमुच्चारणमात्रेणादृष्टमेव नन्वतो

तोयं किंचिददृष्टमुपलभामहे। येनादृष्टकल्पनमन्याय्यं भविष्यति। दत्तजलाञ्जलिश्चायं सिद्धान्त इति चेदुच्यते। अनुष्ठाने हेतुभूतस्यानुष्ठेयस्मरणा
र्थकत्वं करणमन्त्राणामवदतो मन्त्रप्रयोक्तुरेव मन्त्रजन्यशाब्दबोधं मन्यते। तत्तु वयं न मृष्यामहे। किंतु श्रोतुरेव मन्यामहे। शब्दोच्चारणस्य परप्रत्यायनार्थं बोधज
नकत्वस्वाभाव्यात्। नहि स्वस्य स्वेनैव शाब्दबोधाय वाक्यप्रयोगोऽर्थवानुच्यते। वक्तुस्तदर्थावबोधस्य शब्दप्रयोगात्पूर्वमेवावश्यंभावित्वात्। न ह्यबुद्ध्वा वाक्यरचना
युज्यते। स च कारणविशेषविशिष्टस्य वाक्यार्थ इति। लौकिकस्य वैदिकस्य च वाक्यार्थावबोधं निर्विशेषमेव श्रोतुरेव शाब्दबोधमभ्युपगच्छति। अन्यथा लौ
के श्रोतुः शाब्दबोधः मन्त्रेषूच्चारयितुरिति वैरूप्यापत्तेः। किं च श्रोतुरेव मन्त्रतः शाब्दबोधस्य पक्षे मन्त्राणां तत्प्रदेशस्थैरेव सम्भवैर्लभ्यते। प्रायेण हि सर्वे मन्त्राः सं
बोध्यविषयाः। सम्बोध्या हि इषे त्वोर्जे त्वेत्यादिमन्त्रैः शाखाच्छेदने विनियुक्ताः। तत्र शाखां सम्बोध्य च्छेदनस्य संबोध्यैकविषयत्वात् हि नियोगबलाच्च शाखे छिनद्मीत्यध्याहार्ये
शाखेऽति संबोधने प्रथमा। संबोधने चेति व्याकरणसूत्रविहिता संबोधनस्यापत्ने इषे त्वोर्जे त्वा छिनद्मीति शाखां प्रतिज्ञाप्योऽर्थः मन्त्रं प्रयुञ्जानो ज्ञाप
यति। न त्वचेतना शाखानुजानाति। शाखाशब्देन तदभिमानिनी देवता भेदेनोपचर्यते। ननु देवताविग्रहश्चेतनत्वादिकं नवमे निराकृतं। सत्यं निराकृ
तं सत्यं। निराकृतं तु तत्र भाष्यकृता + तत्र च्छेदनस्य न ज्ञापनस्य च तत्रान्वयो न विरुध्यते। अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामिति वादराय
णसूत्रे तद्भाष्यादौ च सम्यगेतत् + प्रस्तुतमत्र कारस्य देवताविग्रहादिकमभिमतमेवेति विस्तरभयान्नात्र प्रपञ्च्यते। किंच स्तोत्रशस्त्रीयाश्चोदिताश्चेतिप
रास्तुत्यदेवताः पश्येव न कुर्याद्बोधकाः। लोके हि लोकनगेयपुष्पादिभिः स्तुत्यः स्तोतिः स्तूयमानस्तेन च मत्कारं जानानः प्रसीदति वैदिकेऽपि तथाभावेन न च स्तोत्रशस्त्राभि
ज्ञातृशंसितोस्तुत्यगुणावबोधं कश्चित् कुर्वीत अग्न आयाहीत्यादिसंबोधनानुपपत्तेः। किं च सांततस्येन शंसनेऽशंसितुरर्थबोधस्तदनुसंधाने स्फुरणासम्भवात् स्तुत्य
देवतार्थावबोधवादिनो न विरुध्यते। किंचाहादशास्तृतीये मन्त्राणां तेन कर्मादिसन्निपातः स्यात्सर्वस्य वचनार्थत्वादिति तस्मिन्नधिकरणे करणमन्त्रे पुनरेतदेव युक्तमिति सन्
निपातः सिद्धं तितः। मन्त्रार्थस्मरणस्य प्रयोक्तृगतत्वादिमे मन्त्रोच्चारणान्तरोऽर्थस्मरणं ततः कर्मेति क्रमः तत्र स्मृतेन व्यवधाने सिद्धान्तव्याकोपः। मन्त्रबोध्यदेवताशा
ब्दबोधवादिनो न काचिदनुपपत्तिः। पदकृत्स्मरणार्थमेव स्यादिति तत्रापि न। देवतागतशाब्दबोधमादायैव दृष्टार्थत्वसम्भवात् न शनुमन्त्रणादिषु तु भवन्मते
ऽप्यदृष्टत्वात्। न च श्रोतृदेवतागतार्थज्ञानस्य कुत्रचिद्दृष्टत्वे देवतानामप्रत्यक्षत्वात् वाच्यं तर्हि लोकेऽपरस्तु हृदयप्रसक्तत्वाद्वाक्यस्य परप्रत्यायकतयाऽदृष्टत्वात्। अनुमा
नास्तिनापरस्मिन्नर्थज्ञानस्य दृष्टत्वमिवेल्लोकवद्देवेऽपि तुल्यं। इयांस्तु विशेषः। लोके वाक्यरचनायाः प्रयोक्त्रधीनत्वात् अर्थज्ञानं विना तदसम्भवात् प्रयोक्तुरर्थज्ञानं नान्त
रीयकमस्ति न तु तात्पर्यविषयीभूतं। मन्त्राणां तु अपौरुषेयत्वेन नित्यसिद्धत्वात् प्रयोक्तुरर्थज्ञानं नावश्यकं। तथा चाव्युत्पन्नानामपि मन्त्रप्रयोगो न विरुध्य
ते। न हि वक्तुरर्थज्ञानं श्रोतुरर्थबोधे प्रयोजकं। अव्युत्पन्नस्य शुकसारिकाद्युदीरितपदपदार्थेभ्यो व्युत्पन्नानां शाब्दबोधात्। ये तु भाष्यादिग्रन्थाः वक्तुरर्थज्ञानमि
ति ज्ञापयन्ति तत्फलाभ्युदयहेतुत्वमात्रं। न तु अधिकारितावच्छेदकमिति सर्वमनवद्यं यदि चैवं मन्यसे चेदुपनीयमानस्य वटोरुपनीतमात्रस्य वटोर्मन्त्रे

अस्मान्यप्यधिकारिता व्यवच्छेदकमाह । शिखावानिति । शिखित्वं बद्धशिखित्वस्याप्युपलक्षकं । उपवीतित्वं च सव्यं सोपरिधृत यज्ञोपवीतत्वं । विशिखी अनुपवीती च य
त्करोति न तत्कृतमिति स्मरणात् । स्नातत्वं च बहिः सर्वशरीरजलसंयोगित्वं । यद्यपि समविधेः स्नानं स्मर्यते तथापि काम्यानामेव सर्वकर्मांगं स्नानानामपि स
र्वेषां वारुणेन च मानवः कर्तुमर्हति कर्माणि विधिवत्स्वे स्वे ह्याह्निक इति आग्नेयात् इदं च कृतसंध्यादित्वस्याप्युपलक्षणं । सुस्नातः सम्यगाचांतः कृतसंध्या
दिकक्रियः । कामक्रोधविहीनश्च पाखंडस्पर्शवर्जितः । जितेंद्रियः सत्यवादी सर्वकर्मसु शस्यत इति हेमाद्रौ वाराहात् कृतसंध्यत्वं चानुदितहोमिभिन्ना
नामेव विशेषणं । अनुदितहोमिनां तु दर्शपौर्णमासयोर्योगे वोद्धरणं कृत्वा होमानंतरं संध्यावंदनमिति धर्मसूत्रात् दशमे श्रीधरोप्येवमाह । उद्धृत्य संध्यां वंदनं ततो
होम इति देवजानीये यद्धो । एतत्तु संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्विति दक्षवचनात् शुचित्वसंपादनद्वारा सर्वकर्मांगत्वात् आचांतः ध्यांतरमुद्धरणं
होमस्य आचांतशब्देन कृतद्विराचमनत्वं उच्यते ॥ कर्मारंभे द्विराचमेदिति स्मृतेः । परं आत्मानमभ्युक्ष्य दुर्वासं मार्जनमुपानहादीनस्पर्शन अधिकारी भवति । अस्पृ
ष्टहीना इति शब्देन म्लेच्छादीनपि अविलोकयन् अधिकारी । एतच्च यदि स्नात्रे प्रदर्शितं तेन कृतार्हतवासः परिधानप्राशनायामसपत्नीकत्वादीन्युक्तानि भवंति

शिखावाननुपवीती च स्नातश्चाचांतोऽस्पृशन्परं । आत्मानं चाभ्युक्ष्य दुर्वासं म्लेच्छादीनविलोकयन् ४२ स्वाध्यायमात्रे सत्काम्ये यजमानोक्तलक्षणः । भा
र्याः संतीह यावत्यस्ताभिः सर्वाभिरन्वितः ४३ यद्वा सवर्णया ज्येष्ठभार्ययैव समन्वितः । यद्वाऽऽधानाद्युपर्यंतं कामपत्नीविवर्जितः ४४ एवं सिद्धेऽधिकारित्वे प
त्न्याः किंचिन्निरूप्यते तुल्यस्वाधिकारः स्याद्दंपत्योरुभयोर्मिथः कुर्वतं त्वेतयोरन्यतरत्याज्यत्यागे प्रवर्तते ४५ यद्वा त्यागं पतिः कुर्यात्पत्नी तदनुमन्यते अ
धिकारेऽपि वैषम्यं प्रोक्तं शब्दानुसारिणा ४६

तेत्र सपत्नीकत्वमप्यधिकारप्रयोजकमित्युक्तं ४२ तदर्थं पत्नीविशेषणान्याह । स्वाध्यायेति स्वाध्यायमात्रेति हिक्रतुयावद्विशेषणाविशेषितो यजमानस्तथैव ल
क्षणोपेतो यावत्यः पत्न्यः ताभिः सर्वाभिः सहितोऽधिकारी ४३ पक्षांतरमाह । यद्वेति । सवर्णज्येष्ठभार्यासहितो वाऽधिकारी । न तु सर्वाभिः । सवर्णानामप्य
नेकत्वे ज्येष्ठाया एव साहित्यं द्योतयितुं ज्येष्ठाग्रहणं । तृतीयं पक्षमाह । यद्वेति आधानानंतरमष्टाविवाहिता कामार्थया पत्न्या तया रहितोऽप्यधिका
रीत्यर्थः ४४ अधिकारिनिरूपणप्रसंगात् पत्न्याः अधिकारे वैषम्यं वक्तुमुपक्रमते एवमिति । अधिकारित्वे अधिकारिस्वरूपे न तु जातिः । स्वर्गकामो यजेतेत्या
दिना कामनायाः स्त्रीपुंसोरविशेषात् उभयोरपि यागे पृथगधिकारात् दृष्टाध्वरथन्यायेनान्योन्याकांक्षयैव यागनिर्वृत्तेः । छा । प्रथमे तु तुल्याधिकारपक्षमाह । तुल्येति फलि
संस्कारमंत्रकर्मसु पत्न्या अपि कर्तृत्वेन तुल्याधिकार इत्यर्थः । तत्रवपने श्मश्रूणोपि साहित्यदर्शनादुपनेनास्तीति । न चैवं यूपवेषधनास्पृश्यता इत्यस्मान्निर्धनत्वेन मा
गेनाधिकार इति । स्त्रीधनानि षड् इत्यादिस्मृत्योपेत द्रव्यतात्यागेऽपि तुल्याधिकारमाह कर्तृत्वमिति ४५ तुल्याधिकारपक्षेऽपि मतांतरेणाह व्यत्यागे वैलक्षण्य

६

तुल्याधिकारमुक्त्वा सहाधिकारपक्षमाह। प्राधान्येति। स्वनिष्ठः स्वतंत्रः। स च प्राधान्ये हेतुः। परतंत्रत्वं च गुणभावः। तत्र विचारप्रयोजनं फलिसंस्कारायेवाचानिकाऽभयोराम्नाता
एव स्युः नेतरे। उक्तं न्यायेऽमर्थोपराहि व्रतोपायनीयमश्नीत इत्यस्मिन्नत्र व्याख्यानावसरे ककौ पाठ्याये॥ तस्मादिति। सहाधिकारादेव हेतोर्यत्रान्योन्यं धर्मविरो
धस्तत्र यजमानधर्मा एव भवेयुः प्राधान्यात् ४७ ननु पत्न्युद्देशेऽपि कर्मणि ध्रुवे वान्यतरस्मिन्नतो अधिकारविघातात्तत्रैवं स्थापनीयमित्येकदेशिमतं दूषय
ति। म्रियेतेति। यारद्दृष्ट्यादौ। आदिपदात् आदयः। विसंस्थिते अपरिसमाप्ते पत्योरपत्योरन्यतरः। जायापतिर्वा। अवशिष्टस्य पारेकः। यथोचितं। तत्तत्कर्मलो
पप्रुक्तमपि इदं च प्रक्रांतकर्मविषये। नाप्रक्रांतविषयं ४८ देशांतरे यद्यप्यतो अप्रक्रांतमपि किंचित्कालकर्तव्यमित्याह। देशांतरेति। उपस्थितं काले प्रा
प्ते। आदिपदेन नित्येष्टिराग्रयणं च। पत्नीपदं यष्टुरप्युपलक्षणं। पत्नीप्रवास एव बह्वादि समस्ततन्त्राभावात्पत्नीग्रहणं ४९ अमुमेव शास्त्रार्थेका
मिष्य वलारयति। एवमिति। एवमवस्थे समाप्य परित्युक्तं श्लोकनान्वयः। प्रक्रांतं प्रारब्धं। किंचन नित्यं नैमित्तिकं च। मृते पत्यौ। अंतरे मितिशेषः। पत्नीयज

प्राधान्येन स्वनिष्ठः सन्यजमानोऽधिकारवान् पत्नी तत्परतंत्रा सत्यंगभूताधिकारिणी तस्माद्द्वंद्वधर्मत्वे पतिधर्मा विलाधिकाः ४७ म्रियेतान्यत
रः पत्योर्यदीष्ट्यादौ विसंस्थिते अवशिष्टः प्रकुर्वीत तत्समाप्तिं यथोचितं ४८ देशांतरस्थते यावद्द्वे सर्वैरिकाग्निभिः तत्पत्नीकारयेत्तावदग्निहो
त्राद्युपस्थितं ४९ एवमिष्ट्यग्निहोत्रादिप्रक्रांतं कर्म किंचन मृते पत्यौ यथाशास्त्रं पत्नी परिसमापयेत् ५० काम्यकर्मप्रवृत्तः सन्वीतं गतस्ततो यदि का
माधिकार अन्योपि तत्स्वयं समापयेत् ५१ काम्यत्वेदं पत्नी कामं कामयेते पृथक्पृथक् यद्यकामयते स्वामी नावश्यं कामना स्त्रियाः ५२॥

मानो वा यथाशास्त्रं स्तुइंडस्याधस्तात्स्त्रमिथधारणादि शास्त्रमन्तिकमप्य यथा समापयेन् यत्काम्यम् यदि प्रारब्धं संदेतरा द्रष्ट्यादिरूपकाम
नायां सिद्धायां तद्वत्तरं कामनाविरहेणाधिकारिमन्येऽपि प्रारब्धं समापनीयमेवः न त्वेतत्त्यागः। शिष्टविगर्हणाद्दोषश्रवणाच्चा यद्गृप्यं वच
नमपि क्काग्य परतयोन्नेये ५० ५१ तुल्याधिकारसहाधिकारपक्षो यद्धमपक्षद्वयमाह। कामत्विति। कर्मणा इति शेषः। कामनाविषयत्वेऽस्मिति
उभयोरपि पुत्रपशुआयुराद्यादि कामनायां एक एव काम्येष्ट्यादिप्रयोगः। कालभेदेनतु पृथगिति। अन्यतराधिकारे तु उभयोरप्यधिकारोऽनुपदं व
क्ष्यते। द्वितीयं पक्षमाह। सहाधिकारपक्षे यष्टुरेव कामाधिकारः। कामना स्त्रियाः अवश्यं नियमेन न संतीति शेषः। तस्याः पारतंत्र्यादिति।

मौर्व ५२

नित्यकर्मरूपाद्धिताग्नेर्यथाधिकारं विनियोगइति भाट्टसिद्धांते नाहायइति। अवश्यकार्येषु नित्यनैमित्तिकेष्विति यावत्। कर्मसु आधानानंतरं चक्षुर्नाशादि
नाग्निरोहितोऽतिरितशक्तिः सामर्थ्यमात्याव लोकनादिरूपं यस्य तादृशस्य पुरुषस्याधिकारो न नश्यति। नित्येषु यावच्छक्तिन्यायात्। यदा तु नित्येष्वपि आरंभ
सामर्थ्यं नास्ति तदानीमधिकारलोपइत्याह। न चेच्छक्तेरिति ५३ ननु नित्येषु चिह्नं यावज्जीवानुष्ठेयत्वेनोपदेशत्वेपि जी। र्णस्य कर्मण्यनधिकार इत्येक
देशिमतं दर्शयितुं स्वमतं दर्शयति। यावदिति। तदेतत्सामर्थ्यपर्यंतः। ननु यावच्छक्त्यामेवाधिकारः। आरंभसामर्थ्यादिति प्राक्प्रोक्तहेतोरविशिष्टत्वात्। शाली
कनाथोक्तेर्विधिः ५४॥ पूर्वोक्तमेकदेशिमतं दूषयितुमाह। यावदिति। असामर्थ्येपि यथाकथंचित्तन्नित्यकर्तव्यमेवेति भावः ५५ तदेव याज्ञिकसंमतिं दर्श
यति प्रायेणेति। आचारस्यापि धर्मे वेदमूलत्वेन प्रामाण्येन निश्चयादाचारग्रहणं। आचारमेव विशदयति न हीति। यावज्जीवादिरूपं कालं असमाप्यैव
र्यामकृत्वा न त्यजंति ५६ ननु यावज्जीवादिसंकल्पमानाभावादस्त्विदं यथाकाले नित्यानां प्रयोगसंकल्पात्ययणमेव निर्वाहाय यावच्छक्ति नित्या

पत्तिरोहितशक्तिस्तस्याधिकारो न नश्यति कर्मस्ववश्यकार्येषु शक्तेस्तु न नश्यति ५३ यावज्जीवादिसंकल्पकारिणः शक्तिलोपनेऽधिकारस्त
देतः स्यादिति शालीकनाथधीः ५४ यावज्जीवादिसंकल्पादूर्ध्वं चेच्छक्तिलोपने तथापि नाधिकारस्य हानिर्वार्तिकदर्शनात् ५५ प्रायेण याज्ञिकाचा
रेष्वेवमेवोपलभ्यते नहि संकल्पितं कालमसमाप्य त्यजंतीति ते ५६ यावज्जीवादिसंकल्पो न्यायप्राप्तो न यद्यपि तथापि वचनात्प्राप्तस्तस्मात्कर्तुं समुद्य
ते ५७ एवं कृते तु संकल्पे ततः शक्तिविलोपने युक्तादर्शनभेदेनात्राधिकारास्ति नास्ति वा ५८ अशक्त्या याजमाने चेत्पत्नीकर्म च लुप्यते न वा
वताक्रतुभ्रेषः स्यादथ वैराग्यतः ५९ त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत् ६० एवं:

नं करणामिति पूर्वपक्षमाशंक्य निराकरोति। यावदिति ५७ पक्षद्वयमप्युपसंहरति। एवमिति। एवं यावज्जीवादिरूपादर्शनभेदेन। शालीकि
वार्तिकशास्त्रभेदेन अधिकारस्यास्तिता नास्तिता चेत्येवं द्वैते प्रयमाणस्यान्तले प्रत्ययस्य प्रत्येकमभिसंबंधः ५८ शक्त्यभावप्रसंगादाह
। अशक्तेति। याजमानं पुरुषार्थरूपं न क्रत्वंगं। पत्नीकर्मापि तादृशी योक्त्रबंधनादिरूपं क्रत्वर्थं तु समाप्यैव याध्वर्युः करोति ५९ ननु त्यागस्य या
जमानत्वेन तदाशक्त्यापूर्वन्यायेन त्यागलोपइति पूर्वपक्षं दूषयितुमाह। त्यागमिति। त्यागं तु सर्वथा स्वयमेव पत्न्यपि पूर्वोक्तपक्षाश्रयणे न कुर्यात्
सर्वथाशक्तौ अशक्ताबुपासीतोपसर्पणाशक्ता वा सेनमध्वइति कात्यायनोक्तप्रकारार्थः। अन्यतराशक्तौ त्वाह तत्रेति यजमानस्य तत्रापि त्यागे
पि अशक्तौ स्वामित्वाविशेषेण तयोर्दंपत्योरन्यतर एकः पत्नी यष्टा वा उभयोरसामर्थ्ये तु आध्वर्यवे नियुक्तः कश्चन अस्वाम्यपि अध्वर्युः त्यागेऽधिकारी ६०

अथ दोषचिंत्यते। बहुभार्यस्यात्र सर्वासामधिकार इति प्रागुक्तं प्रथमपक्षे कनिष्ठायाश्चांगवैकल्ये आज्यावेक्षणासंभवात्कथमधिकार इति पूर्वपक्षं दूषयति। सर्वे
इति। सर्वे स्वामिपत्नीकृत्विजः स्वस्वकर्मसामर्थ्ये नैवाधिकारिणः। कर्मसामर्थ्यं च ऋत्विजां समाख्यावचनयोगाच्च। यत्योक्तफलयोगाद्वचनाच्च। तदु
क्तं। कर्मणि पुरुषाणां प्रधानं स्वामी फलयोगात्। पुरुषप्रयोगमंत्रसंस्कारयोस्त्यागे सामर्थ्यं ज्ञानवचनविशेषाभ्यामन्यइति॥ ७ तत्रावेक्षणस्य केवल
क्रत्वर्थत्वादिमतेनोत्तरमाह तस्मादिति। यस्मात्सामर्थ्यमधिकारकं तस्मात्त्र्यथापि कनिष्ठा फलिसंस्कारकर्मसु त्यागे चाधिकारिणीति भावः ६१
न चाज्यावेक्षणाचक्षुर्वैकल्यादसंभवेन नाधिकार इत्यत आह। क्रत्वर्थेति। शास्त्रीयस्य निष्पन्नत्वादिति भावः ६२। आज्यावेक्षणस्य पुरुषार्थतावा
दिमतेनाह। अन्येति। अपत्ये हि सुप्रजास्त्वादिरूपफलं तच्च वैगुण्याच्च पुरुषार्थतान्यावेक्षणस्य। तच्च सर्वासामपि नाधानं ६३ अधिकारिता
विघातकनिरूपणीनमस्त्वच्छेदकान्याह। पारीष्टेति। नयेष्टव्यं। आधानादिकमपि च कुर्यादित्यर्थः। शेषं स्पष्टं ६४ दोषांतरमाह। दर्शेष्टिमिति। पत्न्या

।।सर्वे स्वस्वक्रियाशक्तिमात्रेणोवाधिकारिणः तस्मादनेकभार्यस्य ज्येष्ठत्वस्याभातीयदि कनिष्ठा वापि नित्येष्टिसमादावधिकारिणी ६१ क
त्वर्थीज्येक्षणादीनि ज्येष्ठैव कुरुते यतः ६२ अन्ये त्वाज्येक्षणादीनि सुप्रजास्त्वफलान्वयात् सर्वाः कुर्युरिति प्राहुस्तस्माद्वांस्यजेतिते ६३ प
रीष्टदोषसंप्राप्तो न यष्टव्यं कदाचन सच दोषः प्रपंचेन समग्रत्राभिधीयते ६४ दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं अग्निहोत्रं विवा
हं च प्रयोगं प्रथमं स्थितं ६५ न कुर्याज्जनके ज्येष्ठे सोदरे वाप्यकुर्वति क्षेत्रजादावनीजाने विद्यमानेपि सोदरे ६६ नाधिकारविघातोस्ति भिन्नो
दर्येपि चौरसे पंग्वंधमूकबधिरपतितोन्मादद्दूषणे ६७ मन्यस्तेछिन्नहस्तादौ यद्वा षंढादिदूषणे जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियां ६८

विधापालनमेव परिवेत्तृत्वमिति भावः। अत्र प्रत्येकं निमित्तानि न तु समुच्चयः। तद्यथा कृतदर्शे जनके ज्येष्ठे रससोदरस्यैव दर्शाधिकार इति
पथात्तप्रयत्नं न तथा च कृताधानजनकसोदरवत्वे पितृयोः कृतपौर्णमासादिकयोः सतोरितस्य पौर्णमासादौ नाधिकार इति भावः। भिन्ने
न पुनराधानोत्तरं अकृतदर्शादिमत्वे पितृयोर्नेति प्रसंग इति सूचपितुः प्रथम इति ६५ न कुर्यादिति। अत्र सोदर इति औरसः सोदरो ग्राह्यः। तत्पाच
क्ष्यते क्षेत्रजादावितिक्षेत्रजादौ सोदरे इत्यनेनान्वयः। आदिशब्देन कन्यावस्थायां जातः ६६ नेति सोदरस्यैवौरसस्य भिन्नोदरत्वेपि विघातकत्व
माशंक्य परिहरति भिन्नेति चकारः समुच्चये। अयं तयोराधानादिषु अधिकारितेमत्ते वदोषो नान्यथेत्याह पंग्विति पंगुर्निरंघ्रिः। एकेन द्व्याभ्यां वा एवं सर्व
त्रत्रांधोनेत्रहीनः। मूकोवाग्धीनः। बधिरः श्रोत्रः। पातितः प्रापादककर्मकारी। उन्मादो अपस्मारी। तदेव दूषणं यस्य ६७ संन्यस्तेति सन्यस्ते आधानाय कृते
वप्रव्रजिते छिन्नहस्तादौ। आदिपादव्यन्वासिकादि। यद्वा प्रकारांतरेण समुच्चयनिवारणार्थं वाग्रहणं। तेन प्रत्येकं निमित्तता षंढः प्रसिद्धः। अपव्धि धनपुं

तयोरिति । तयोस्त्वनधिकार इति । अथ सोदरस्य विशेषमाह ज्येष्ठ इति । ज्येष्ठे पूर्वोक्तदोषरहिते ज्येष्ठे सोदरे अग्न्याहितविहीने सति कामतो ऽकारिणि श्रामणके प्राप्ते वा विकारः
६९ तौ दृशेषितरि तु अनुज्ञया पिनाधिकार इत्याह । पितुरिति ७० लौगाक्षिमतमुपन्यस्यति । पितरीति । अनुज्ञयेत्यध्याहारः । अनुज्ञातस्य पित्रा तु आधाने सर्व
सम्भवेदिति सुमन्तुस्मरणात् । तथा च विहितप्रतिषिद्धत्वाद्विकल्पः ७१ एतदर्थं कठसंमतिमाह । पितेति । तत्र आधाने ७२ अथ सोदरस्यान्ताभिनिमित्तान्याह । योगे
गेति । योगः पातञ्जलः । कुब्जो भग्नपृष्ठः । वामनो ह्रस्वः । जडो वेदग्रहणासमर्थः । गद्गदः स्खलद्गीः । एषां श्रुतिचोदितेष्वपि कर्मस्वनर्हत्वमसामर्थ्यात् । न हि खर्वे पृष्ठरिवेषादेस्तु
गसादनादि संभवः । तदर्थं चतुरगादिपरिमाणं वाधिनकार्यानुपपत्तेश्चेति दिक् ७३ देशान्तरस्थेऽपि ज्येष्ठेनानधिकार इत्याह देशान्तरस्थ इति । स
र्वं ७४ प्रोषितज्येष्ठस्य तु कालविशेषप्रतीक्षया अधिकारमाह । प्रोषित इति । अत्र त्यो विशेषो हेमाद्रौ कल्पतरौ च ज्ञेयः । विस्तरभयान्नोच्यते ७५ प

तयोस्त्वनधिकारित्वान्न तस्याभिक्रियाप्रवृत्तिः ज्येष्ठस्याग्न्याहितविहीने सत्याधेयं तदनुज्ञया पितुः सत्यप्यनुज्ञाने नादधीत कदाचन पितर्येनाहि
ताग्नाववष्याद्धीत अथवा सुतः अग्निहोत्रं च जुहुयादिति लौगाक्षिकारिका पितापस्याग्रजो भ्राता न कुर्याद्यदि पितामहः तपोग्निहोत्रं यज्ञं वा सर्वा कुर्या
त् कठाशयात् योगशास्त्राभियुक्ते वा कुब्जे वा वामने जडे गद्गदे वाग्रजे दुष्टे परिविदन्न चानुज्ञः ७३ देशान्तरस्थो नज्येष्ठोज्ञायेताहितवानिति कनी
यानधिकारी चेदादधीता विचारयन् ७४ प्रोषितस्य यदा ज्येष्ठस्यापेतान्याहितानलः षड्वत्सरान् प्रतीक्षेत आदधीतानुज्ञया ततः ७५ यद्वा पापं भवेज्ज्येष्ठे प्राक् पूर्वं भार्यापरि
ग्रहे यागाग्निहोत्रतन्त्रोस्तीत्यादेकश्चिन्मतान्तरं ७६ पितरि चेत् भार्ये वा देशान्तरे पिवा अधिकारविघातस्य न पुत्रस्यापजायते ७७ रुग्णकेशः समुत्पन्नपु
त्रो गम्यादिपथमाचरेत् सत्रान्तरे प्रयुक्ते वानियमो नेति केचन ७८ अभिचारवती यो वा द्वेषिणी द्रोहिणी च या आधाने सा परित्याज्या नवा साध्वामतान्तरात् ७९

रीघ्रदोषस्यमतान्तरेणावैकल्पिकत्वमाह । यद्वेति । यागः आधानपूर्णमासादिः । एतच्च अननुज्ञापरं परिवेत्ता कथं भवेत् । दारैस्य परिविंदेन्नाग्निहोत्रे
णानेत्यपेति स्मरणात् । इदं च विवाहे प्राप्त्याधिकरणापनार्थं वचनमिति केचित् ॥ ७६ न कुर्याज्जानके ज्येष्ठे इत्यस्य प्रागुक्तस्यापवादमाह पित
रीति । अत्रापि देशान्तरपुरस्कारेण षड्वर्षादि कालपरीक्षणं ज्ञेयं ७७ वैकल्पिकमधिकारिविशेषणमाह । रुग्णकेश इति । रुग्णकेश इति शरावलोपल
क्षकेनोपुत्र इति नामाभिप्राशासेनं तवेज्योतिष्मतीमिति वृषा घस्य पुत्रो जातस्यादिति श्रुतेः श्रवणात् जातपुत्र इत्यस्य विशेषोपलक्षकं
साच षोडशवर्षो द्वैध्येति तेनाष्टाचत्वारिंशद्वर्षीणि ब्रह्मचर्यं चरेदिति स्मृतिस्पष्टता भवति । स्वल्पानुग्रहायमतोऽत्र स्माह । नियम इति । सत्रान्तरेषु तत्र
मतस्य तिवत्सने सुप्रेथा । यदहरेव नं अहेऽपनमेदथादधीतेति ७८ कृच्छ्रिणीविनेवाधिकारमा । अभिचारवतीति द्वेषिणी मह द्वेषिणी द्रोहा । प्रिय
भाषणं कमच । आधाने आधानोत्तरे भाविकर्मसु चापरित्याज्या अनधिकारिणीति भावः । मतान्तरमाह । नवेति मतान्तरात् सहाधिकारित्वादिमतादित्यर्थः ७९

८

अधुनायजमानासन्निधाने कश्चित्कर्मणि पत्न्या अधिकारमाह देशान्तरे इति अग्निहोत्रादिकमिति। आदिना पर्णमासादि सर्वं नित्यात्कलिमिति। निक्षिप्याग्नी
न्स्वदारेषु परिकल्प्य विजेतर्त्वेवेति वचनात् सोमसंस्थां निवेधति नैवमिति ८० रुद्रस्कन्नमन्त्रमाह पितृयज्ञ इति। एतत्त्रयं विना न्यत्किमपि न भवतीत्यर्थः। याज
मानक्रियान्वितेमित्यनेन व स्त्रमाणामाग्रयणे व्रीहिस्तंवय सोमवतीति भावः ८१ ननु तत्रापि याज्ञस्य याजमानस्य विद्यमानत्वेन तस्य न्यत्वात्कथमधि
कार इत्याशंकां परिहरति। याजमानेति याजमानक्रिया पूर्णपात्रग्रहणाविसुक्रमणादयः तत्कृत्यं कुर्यात् देवतोद्देशेन त्यागात्मकयाजमानो न सह तं तु का
लेऽस्विकं कुर्यात्। त्यागमात्रं पत्नी कुर्यादित्यर्थः ८३ उभयोरसन्निधाने पि एवं ऋत्विग्यागं करणां अवश्यकरणमाह। पत्न्यामिति। अपि शब्दोत्वंगति
तायां। वा शब्दो विकल्पे। सर्वकर्म त्यागमपि च। ऋत्विग्यथोऽपि यथोचितः ब्रह्मादयः स्वस्वकर्मेत्यर्थः। तदभावे त्रयो हौत्वाद एको वा प्रचरेत्। तदा वो धायन निक्क

पा

देशान्तरगते पत्यावग्निहोत्रादिकं यत्र त्विक्समायुता पत्नी कुर्यान्नैवं तु सौमिके ८८ पितृयज्ञोऽग्निहोत्रं च प्रकृते दर्शे विनेतरत् पश्चिज्यासो
मयागादि याजमानक्रियान्वितं स्वामिनि प्रोषिते नास्तीत्युक्तं शास्त्रानुसारिणा ८९ याजमानक्रियोऽन्यं दर्विहोमादिकं चन उद्देशत्याग
मात्रेण याजमानेन संयुतं कुर्यादवसर प्राप्तमृत्विक्पत्नीसमन्वितः ८३ पत्न्यां रजस्वलायां वा प्रसूतायामथापि वा सर्वमेव नियुक्तः स
कुर्यादृत्विग्यथोचितं ८४ अतोऽग्निहोत्रं नित्येष्टिं पिंडपितृयज्ञ इति त्रयं कर्तव्यं प्रोषिते पत्यौ नान्यत्स्वामिक्रियान्वितं ८५ प्रवसत्याहिताग्नौ
पंचाग्रयणमुपागतं अग्निहोत्री व्रीहिस्कं वृ मितिपसंतमाश्रयेत् ८६ नैमित्तिकास्तु जातेष्टिग्रहेष्टि पर्विकाः स्वाम्यागमनपर्यन्तमुत्कृष्टव्यास्तु शे
शेषतः ८७ प्रायश्चित्तेष्टिसंप्राप्तौ कुर्यात्स्वर्गाहुतिं बुधः उद्धृतेषु प्रसंप्राप्तौ जुहुयाद्द्वादशाहुतीः ८८ अग्न्याधेयादिकं प्राप्तमुभयानुगमादि
ना स्वाम्यागमनपर्यन्तमुत्कृष्टव्यमसंशयं ८९ मथित्वा पावके सर्वप्रायश्चित्तं विधाय च मित्रायेत्यादिभिर्हुत्वा द्वादशानुगे महतीः ९०
अग्निहोत्रं यथाकालं नित्येष्टिं च विनेतरत् आ स्वाम्यागमनात्तिष्ठेदागत्याथो रधीत सः ९१

तिः ८४ रुद्रजमंत्रमुपसंहरति। अत इति स्पष्टं। ८५ पर्वकं दर्विहोममाह। प्रवसतीति स्पष्ट। ८६ नैमित्तिकीनामिष्टीनां गौणकालाभावाल्लोपप्रसक्त्या
ह। नैमित्तिका इति। पर्विका इत्यत्र वहु व्रीहिः। पुरुषोपपातरूपाः। अशेषतः। स्वरूपेण। तेना सा स्वाने पूर्णाहुतिरपिनेति भावः ८७ कर्मोप
याते रूपान्तु विशेषमाह। प्रायश्चित्तेति। प्रायश्चित्तेष्टयः व्रातपत्यादयः। बुध इति: प्रभुः प्रथमकल्पस्येत्यादि। नोनिषिद्ध पूर्णाहुतिपक्षमेव प्रथमप
क्षसामर्थ्येपि कुर्यादिति भावः। उद्धृते ऐ विशेषमाह उद्धृतेति। स्पष्ट। मित्रायेत्यादयः। ८८ प्रोषितस्य पुनराधानप्राप्तौ निर्णयमाह। अग्न्याधेयमिति। आदि
ना सर्वैः पुनराधानमितः। असंशयं रहितो लवो न कार्य इति भावः। यस्योभावग्नी अभिनिम्लोचोदितेभयानुगमः प्रसिद्धः ८९ तादृशस्य लेपुनराधा
नोत्कर्षत्र अनुगतयेन मितिकमाह। मथित्वेति। सर्वप्रायश्चित्तं होमविशेषः। च कारः समुच्चये ९० एतराधानोत्कर्षविपि दर्शाग्नित्यकार्यमित्याह। अग्निहोत्रमि

राम•

केशवसिद्धांतानुसारेणाहरुद्दत्तमतमुपन्यस्य मतांतरमत्रोपदिशति। एवमिति। काम्याद्युत्त्यनभिन्नवाक्यत्वात्तपोनस्तत्कं ९२ ९३. नित्येष्वपि कचिदपवादार्थं
-- तत्रापीति। सोत्तरवेदिकाश्चातुर्मास्यपश्वादयः। नित्यनैमित्तिकत्वात्काम्यानिराकरोतीति आधानेति ९४ नन्वाधानविशेषे आधानात्कर्षः स्यादित्याशंक्य परिहर
ति। उभयेति आदिपदात्परीमासेष्टिः। तदभावादुत्तरेणां च न भवति। इहदर्शनेऽपत्तन्मते॥ ९५ अधुनाऽप्याढ्यत्वमप्यधिकारितावच्छेदकमिति वक्तुं प्रसंगात्साग्रेः
प्रवासमाह। धनार्जितिमित्र आदिनार्जनेरर्थलिप्सया प्रवासो युक्तो भवति। तत्रापि हेतुमाह धनेरिति। यागस्यार्थसाध्यत्वात्। परिशेषात्सिद्धार्थः मनु वदति तीर्थेति।
आदिपदात्सुहृद्दर्शनादिकार्यांतरग्रहः ९६ ननु तस्यैतस्य महाफलदत्तीर्थस्नानादिजन्यमपूर्वं न स्यात्। तद्द्विधायकवाक्यानां संकोचापत्तेश्चेत्यत्राह। ब्र
ह्मेति। ब्रह्मादिग्रहणं देवतामात्रोपलक्षणार्थं पितृदेवताः कव्यवाहनादयः। व्रतानि एकादश्यादीनि। तीर्थानि पुष्करादीनि। तपांसि पराकादीनि वेध्यानयेत्
दिद्दश। अग्निहोत्रसंज्ञकं कर्म यस्यास्तीत्याग्निहोत्री तदुद्दिविधेते। तदुक्तं यज्ञपार्श्वे। एवं सति गृहस्थस्य गृहे संपवे दिग्यातीर्थाघर्थं नतु व्रजे

एवं केशवसिद्धांतात्प्रापितस्याग्निसुक्रियाः अवश्यं भाविनीरुक्त्वाधुनाव स्येमतांतरं ९२ काम्याः क्रिया न कर्तव्याः स्वामिनि प्रोषिते सति नि
त्यनैमित्तिकीः कार्याः प्रवसत्यपि भर्तरि ९३ तत्रापि नैव कर्तव्याः क्रियाः सोत्तरवेदिकाः आधानपुनराधाने न स्तः प्रोषप्रवासिनि ९४ उभयानुगमा
दौ तु प्राप्ते स्यादाधेयतः पुरा नु किंचिदग्निहोत्रादि कर्तव्यमिह दर्शने ९५ धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः धनैर्हि संभवेदिज्या
तीर्थाद्यर्थं न तु व्रजेत् ९६ ब्रह्मा विष्णुः शिवः सूर्यो गोविप्रांपितृदेवताः अग्निहोत्रिगृहे संति व्रततीर्थतपांसि च ९७ श्रीरामचंद्रजी

त्यग्निहोत्रिणः दिवता ब्रह्मविष्णुमुखा इंद्रोपेंद्रादयस्तथा अग्निहोत्रशालुसंहितेवेति तीर्थमालिका। ब्राह्मादिस्तपेशाने वनतपोनजपादिक
मिति। अपरे त्वेवं वर्णयंति। अकेचेन्मधु विंदेत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत्। इति न्यायेन तीर्थसेवाद्यर्थं प्रवासो न
भवति। मत्यर्थमन्यत्रावश्यककार्यार्थं च प्रवासोऽस्त्येवेति। उक्तं चादृष्टार्थाय प्रवासो स्कनादृष्टायकर्थं चनेति। तथा। न वित्ताच निर्गतेन क्रीडाद्यर्थं न तु व्र
जेदिति तयोग्रहणेन प्रायश्चित्तप्रत्याम्नायभिर्द्दिष्टतीर्थस्नानक्रोशादिपरिमाणगमनार्थप्रवासाः प्रत्याख्याताः व्यग्रदृष्टाग्नेकादश्यादिष्वपि होमा
पेगमत्तस्तु कस्थम स्पहविः शेषभक्षणोत व्रतलोपप्रसक्तिरिति ध्येयं। ब्रह्मादिपदज्ञेनेन गोब्राह्मणपरिचर्या पितृदेवतातपसा व्रताचरणेन तीर्थस्ना
नेन तयः स्कोऽशेन यद्धर्मजातं तत्तदग्निहोत्रादि कर्मणा जायत इति। यथा। यावानर्थ उदपाने सर्वतः संप्लुतोदके तथात्रेति ९७ श्रीहनुमंतायनम

९

सर्त्तांच प्रवासानुज्ञार्यौ देशतः कालतश्चावधिमाह। अग्निहोत्रेणेति। द्वाभ्यां गुणाविध्याश्रयेण नाग्निहोत्रशब्दोऽग्निवाची। साग्निप्रवासे दोषाभावश्चापना-- इति। शतेयोजनानिपश्चिमः साग्निकोपलक्षणार्थमाहिताग्निरिति। आनर्थक्याद्दुर्बलमपि सबलं भवतीति न्यायात् ९८ अन्वष्टमिति। अजुहुन होममकुर्वन्नः तच्च प्रवासादर्थात्सावाभवति। केनापि हेतुना तस्यान्वष्टमिदं स्वयं होमम कुर्वतः पुनराधेयं नैमित्तिकं स्यात्। तस्य चांतरस्थे विकल्पमाह पवित्रेष्टि रिति। अपरे तु प्रवासहेतुना पुनराधेयमशक्तापवित्रेष्टिरिति व्यवस्थितविकल्पमाहुः। एतेनार्थोर्थमपि वतुः क्रोशात्मकस्य योजनस्य शतसंख्यावधि प्रवासस्तन्निषेधश्चाऽऽपर्य्यंतप्रवासानकार्यः। इत्यभिहितं भवति ९९ एवं हि श्रूयते। यावज्जीवं दर्शपूर्णमासाभ्यां यजेत। त्रिंशद्वर्षाणि दर्शपूर्णमासौ जीर्णो वा विरमेदिति। तत्र त्रिंशत्संवत्सरपक्षे तदूर्ध्वं दर्शपूर्णमासयोरेवाकरणं उतकर्ममात्रस्येति विप्रतिपत्ता वाहाऽदृष्टेरित्यादि चतुर्भिः। तान्येवाह दृष्टेरि। दृष्टदर्शपूर्णमासयागस्यासंकल्पितप्रथमयोग एव परिगृहीते जीर्णत्वे जीर्णो वा विरमेदिति विहिते कालेऽशक्तावस्थायामिति यावत्। तथा त्रिंश

अग्निहोत्रेणरहितः पंथानं शतयोजनं आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति ९८ अन्वष्टमजुहृत्वा नोहा वयेदग्निर्गादिना तस्य स्यात्पुनराधेयं पवित्रेष्टिः तथापि वा ९९ दृष्टेः संकल्पिते पूर्णे जीर्णत्वे त्रिंशदाब्दिके पूर्णे सति निवर्त्तेत होमसोममखाद्यपि १०० केश्वस्वामिनामते स्युः मेतन्निरूपितं तस्मात्त्रेताग्नि निष्पाद्यं नाग्निहोत्रादिकं च न १ प्रधाने हविर्विकाराः स्युः सर्वमन्यद्दृढवेदिह यद्दग्निहोत्रमेवस्यात्पशुसो[illegible] मादिनवितिर २ त्रिंश[illegible]दिनादिभिर्वाग्निहोत्राद्युपरमोस्त्विति वेदांते पुरुषार्थाधिकरणे प्राह वामनः ३ कुटुंबभरणाया मन्ने पसत्रिवत्सरं काम्येन सोमयागेन यजेता सौन चेतरः ४ तावदन्नविहीनोपि कुर्यान्नित्यं तु सौमिकं यथाल्पगुणोपेतं यथासंभवदक्षिणं यो नाहिताग्निः शतगुः सहस्रगुरसोमपः नाप्नावचीर्णं योऽयः स्यादि[illegible] ॥

त्संवत्सरात्मके काले पूर्णे सति होमोऽग्निहोत्रं सोमेमखाद्यपि कलंकमजात निवर्त्तेतः इदं केशवस्वामिनाप्युक्तं तस्मात्त्रैताग्निसाध्यं किमपि न भवेत्। धारणं तु प्रतिपत्त्यार्थवत् १०० ॥१ पक्षांतरमाह। यद्वेति। इष्टिविकाराश्चातुर्मास्यादयो न स्युः। दर्विहोमसोमविकाराश्च भवेयुः। नैमित्तिके पूर्णेष्टान्येपरामाहुतिः। अथवा पशुसोमविकारा न स्युः। दर्विहोमोऽग्निहोत्रहोमादिकं तु कार्यमेव २ प्रथमपक्षसंमतिं दर्शयति। त्रिंशदिति। आदिपदात्सकलमपि। इति वेदांतपुरुषार्थाधिकरणे वामनेन साधितमित्यर्थः ३ काम्यसोमाधिकारिणमाह। कुटुंबेति। यावंतो यजमानस्य स्वर्गत्वान्गवादयः। कुटुंबं तत्तद्दृहस्थस्य विज्ञेयं भरणाहरणमिति। त्रिवर्षाधिककुटुंबभरणपर्याप्तद्रव्यवान्। काम्यसोमानुष्ठानेऽधिकृतो भवति नेतर ४ नित्यसोमे काम्यायोपदेशार्थमाह। तावदिति गुणाः अरुणादयः। शेषं स्पष्टं। यच्चेयजत्याश्चर्यवचनेन तत्काम्यसोमपरं नित्याकरणे प्रत्यवायश्रवणात् ५ तमेयादाह इति

अयाद्याधिकारोपजीविविषपुत्राहाय यथार्थमिति। यथार्थमिति। पथार्थमिति। यथाथेय यथाप्रयोजनं यज्ञार्थमिति यावत्। अन्यत्र कुटुंबभरणादौ। आदिपदा
दातिथ्यादौ। मासः स्मृता — — काकयोनिमिति वा पाठः। एतेन याज्ञवल्क्येनापि नित्यं विधेयमित्युक्तं भवति। यत्र यज्ञार्थं याचितं द्रव्यमिति निंदावचनेन तत्काम्य
येत्तपरं॥७॥ अथ सत्स्वपि अधिकारे नित्यकर्माणामकरणे दोषश्रवणाद् अवश्यमनुष्ठेयत्वमाह। निर्धनेति चतुर्भिः। कुमार्गः प्रतिग्रहादिभिन्नैः। तदुक्तं। समवि
ताग माधन्यादायो लाभ अयोजयः। प्रयोगो विप्रयोगश्च सत्प्रतिग्रह एव चेति। चौर्यस्यापि प्रसक्तौ विशिनष्टि। चौर्यादि इति। परस्वेनोद्दीतेति श्रवणात्। य
ज्ञार्थं कुरुक्षेत्रादिषु प्रतिग्रहोपि न दोषायेति भावः। प्रमादादिति मन्वादिनिंदावचनं काम्यहोमविषयं न नित्यविषयं। तेषाकरणे श्रवणास्य बलीयस्त्व
र स्मृते श्रुतदयेक्षयादौर्बल्यात्। आवश्यकेति। सर्वेष्टं भारसमृद्धौ सुवर्णाभिन्नदेयदक्षिणाद्रव्यालाभे तु चौर्यमपि कृत्वा नित्यं सदक्षिणं कार्यं।

यथार्थमिच्छितं द्रव्यमन्यत्राविनियोजयेत् श्राद्धादौ स्यात्पाते यो भास योनिं स गच्छति ७ निर्धनो धनसाध्येषु नित्येषु विहितो यदि। चौर्यादन्नैः कु
मार्गैरपीच्छेद्धनमर्जयेत् ८ सूर्यग्रहे कुरुक्षेत्रे मेषीकृष्णाजिनादिकं चांडालात्प्रतिगृह्यापि यज्ञेनावश्यकैर्मखैः ९ प्रमादाद्धिग्गम्यार्थमग्निहोत्रमु
यामते उत्पादितेनैवा काम्यानि काम्यहोमविवृत्तया १० आवश्यके तु सोमादौ सर्वसंभारसंभृते सुवर्णाप्रतिसिंगद्रव्यालाभे हि चारयेत् ११ इष्टानित्येष्टिर
पवाग्निष्टिः सोममाहरेत् एवं सोमेष्टिपर्वत्वमेवेतुल्यविकल्पनं १२ अव्यवस्थितविकल्पाभाकातीयवचनाद्भवेत् यस्तु पक्वे सोमः सन्नाद्धीत ह
नाशने १३ स कुर्यात्सोमपर्वत्वमन्येषामिष्टिपर्वता विधिरेतोक्रमन्याद्भ्रूणव्यवस्थितविकल्पने १४ त्रिपुरुषमविच्छिन्नं यस्य सोमः कृतः तु
भवेत् तस्य स्यात्सोमपर्वत्वमन्येषामिष्टिपर्वता १५ विप्रे सोमेष्टिपर्वत्वे विकल्पं प्राह जैमिनिः राजादेरिष्टिपर्वत्वमपसोम एव नियच्छति १६

नादक्षिणो यज्ञो भवतीति श्रुतेः। पत्र सुवर्णमेव दक्षिणादेयः। तत्र सुवर्णं येक्षापायं यथासंभवं देयं। न तु सुवर्णचौर्यं तस्य महापातकत्वेनाधिका
र एव विहन्येत। अप्यन्यायशतं कृत्वा भर्तव्यो मनुरब्रवीदिति स्मृतेः। पोष्यान्तर्गतत्वाच्चाग्नीनां नित्यमनुष्ठेयमेवेति भावः ८।९।१०।११। अथोपक्रमसोम
संभारस्यापि यत्पुः कृतदर्शपूर्णमासत्वे चाधिकारकमित्याह तिविकल्पेनाहाइष्टेति इष्टानित्यैष्टिर्दर्शपूर्णमासौ येन सततया। अथवात्र निष्टेष्टि
:तो मं कुर्यात् उभयथाश्रवणात् स्फुतुल्यविकल्पः। १२ कल्पान्तराभिप्राये राणाह। अव्यवस्थितेति। व्यवस्थां दर्शयति। यस्त्विति। स इष्टदर्शप
र्णमासाभ्यामिष्ट्वा सोमेन यजेतेति सोमेन वोपक्रमः सोम इति कात्यायनवचनात्। सोमेष्टिपर्वकत्वे व्यवस्थितो विकल्पः १३ अत्रैव विधिरलोकप्र
कारमाह विधीति। अनाहकस्य अनादेष १५ जैमिन्युक्ते विशेषमाह। विप्रेति। तुल्यविकल्पो वा व्यवस्थितो ब्राह्मणानामेवेति भावः १६ श्रीमहादेवजी

इष्टानित्येष्टिरित्यादिना कृतदर्शपूर्णमासस्याकृतदर्शपूर्णमासस्य च सोमाधिकारमुक्त्वा ऽधुनादैवीमात्मपतिरासार्थं कृतप्रायश्चित्त एव सोमेधिकारीति दर्शयन्
ऐन्द्राग्नं पुनरुत्सृष्टमालभेतेति श्रूयते तत्राधिकारिणमाह। पितेति। सोमयागेनेनेष्टवानित्यर्थः। वाशब्दोसमुच्चयार्थः। द्विपुरुषासोमपीथिन इति वचनात्
पुनरुत्सृष्टशब्दार्थः खपंवस्यति। देवताद्रव्यलक्षितं ऐन्द्राग्नः पशुर्यागउच्यते १७ द्विपुरुषासोमपीथिन इति वचने द्वेधा विप्रतिपत्तिमाह एवमिति। तत्र पूर्वोक्त
पक्षो मीमांसकाभिमतः कतिपयाज्ञिकाभिमतस्त्वद्वितीयं पक्षमाह यस्येति। कैश्चिद्याज्ञिकैरुच्यत इति शेषः १८ तत्र संमतिमाह पितृहीति। एवं पितामहे सो
ममेव्य्पि विततयेसोमयाजिनि प्रायश्चित्तपंप पशुर्न भवतीति सूक्तं भाष्ये १९ स चायं पशुर्गौर्वा छागो वेति संदेहे सिद्धान्तमेवाह [illegible] चोदकेति। चोदकेति
चोदकोविधातः। सर्वेषांप्रकृतिरग्नीषोमीयः। स च छाग एवाम्नातः। छागस्य हविष इत्यादिना। अत्रापि सामान्यपशुशब्देनोपात्तः पशुः छाग एव भविष्यति। एवं सति
चोदकानुग्रहः न चास्य पुनरुत्सृष्टत्वं न संभवतीति वाच्यम्। पूर्वं वाहितोदोर्वत्स्यादुत्सृष्टः पुनरश्च समर्थः स न पुनर्वाहितः स पुनरुत्सृष्टशब्दार्थ इति। स चायं छा

पितापितामहो वापि सोमं यस्य न पीतवान् ऐन्द्राग्नं पुनरुत्सृष्टमालभेत पशुं द्विसः १७ एवं मीमांसकाः प्राहुर्याज्ञिकास्त्वपि केचन यस्येन पृः पशुः कैश्चित्पिताप
स्य न सोमपः १८ पितर्यसोमपीथे ऽपि सोमपश्चेत्पितामहः तत्रैन्द्राग्नो न कर्तव्यो मारद्वाजीयभाष्यतः १९ चोदकानुग्रहाच्चायं पशुः छागो वगम्यते पुनरुत्सृष्टवाचो
हि वाहोत्सृष्टः पुनर्वहन् छागोपि संभवत्येव हि मोचले २० पुनरुत्सृष्टो गौ स्याद् इति गव्यादृतीरितः॥ सत्रेऽगोजातिनिपतंत पुनरुत्सृष्टशब्दने २१ तथाप
न्येपितद्वाच्याः शाखान्तरश्रुतः गोपशुः पुनरुत्सृष्टो ऽग्नीषोमीयो भवेदिति २२ पुनरुत्सृष्ट [illegible] शब्दार्थो गोशब्देन विशेषतः। तेन
गोरिति वुध्येत पुनरुत्सृष्टशब्दभाक् २३ तस्मादन्यपरेपि वाक्ये नोक्तमसंशयम् गोत्वन्यपशुच सामान्यं पुनरुत्सृष्टशब्दने २४ वाच्यत्वस्याविशिष्टत्वा
चोदकाल्लोकगर्हणात् कलौ युगे तु यो यागनिषेधाच्च भवेदजः २५ पुनरुत्सृष्टशब्दार्थश्छाग एव भवेदिह स्वकेहेन भरद्वाजः सुस्पष्टमिदमब्रवीत् २६
सत्येकमं पुनरुत्सृष्टं श्लोकशेसाध्यं पुनर्मुनिः लोगाक्षिरनुष्टात्वं पशुमत्रोपदिष्टवान् २७ पमपीर्यः पुरिजातः सोनुसृष्टोभिधीयते समर्थत्वाविशिष्टत्वाच्छागोपि
न विरोत्स्यते २८ सोमाधिकारहेतुत्वात्सोमात्य वैत्रपर्वणि पशुरेव विधातव्य इति कर्कस्य संमतिः २९ ॥ श्रीरामजीसहायः ॥ छ ॥ ६
गोपि संभवति। हिमाचलादिदेशान्तरसेववाहवाहकत्वात् २० एकदेशिमतमुत्क्षिप्य दूषयति। पुनरिति। पुनरुत्सृष्टो गोमृग इति शाखान्तरेश्रूयते स्वचैतु पुनरुत्स
ष्टमात्रं। तत्र सामान्यविशेषोपसंहारन्यायेन पुनरुत्सृष्टशब्दोपि गोजातौ निपतत्विति २१ न नु कृत्रचित्सामान्य एव श्रूयते ऽतो विकल्पो स्विचेदत्रोह तथापीति। शा
खान्तरे श्रवणादन्येपि सामान्येन श्रुतो पुनरुत्सृष्टशब्दात्तद्वोगोजातिशब्दः। शाखान्तरीयवचनमाह गोपशुरिति। विशेषतः आग्नेयवत्तुर्धाकरणन्यायेन दूषाय
ति। तेन शाखान्तरस्थेन। अन्यपरेशात्पिगोपशुपरेणापि वाक्येन पुनरुत्सृष्टशब्दो गोपु छागेषु च सामान्येनाभिधीयतेऽतो धत्ते इत्यसंशयं तथा च पुनरुत्सृष्टशब्देन छागो
पि बुद्धिगोचरो भवति एवं च सति। अजत्वंएव ग्राह्यो नेतरः २४ तत्र हेतुचतुष्टयमाह। वाच्यत्वादिति। वाशब्दस्य सामान्ययोगिकत्वेनोभयत्राविशिष्टत्वात्। तृतीयस्य हेतु २५ उपसं
हरति पुनरिति संमतिमाह स्वकेति २६ अपि मन्येवार्थे वलोगाक्षिसंमतिमाह। सत्येकेति पुनरुत्सृष्टशब्दं श्लोकशसाध्यमिति २७ ला — कंपारिभाषिकमनुसृष्टशब्दा

अग्नीषोमीयेतिस्पष्टं भिन्नतंत्रत्वाश्रयणेनेदमुपन्यस्यति। एतश्चेति अनंतरं सोमानंतरमित्यर्थः। तथा च विकल्पः। स च व्यवस्थित एवानैष्टिकः। व्यवस्थि
ताः व्यवस्थाप्रत्याः ताश्चैवं बोध्याः। असोमाधानिनः सोमात्पूर्वं सोमाधानिनस्त्वनंतरं। आधानानंतरं सोमादिकरणेन सोमाधानेवा हन्येतानस्मात्सोमानंत
रमेव गोप्रत्यवदित्याशयः। कर्कस्तु सर्वपक्षे सोमात्पूर्वमेवाधिकारनिष्पत्तिलाभात्। अत एव विधिरिदौ ब्राह्मणपनिमित्तिकं नैमित्तिकाः पश्चाल
भान्तरमाह। यद्इति। असोवृत्स्यमाणलक्षणायो दुर्ब्राह्मणादौ ब्राह्मणपगुणयुक्तः स न सोमपानकर्तुमिच्छति। यस्मादित आदौ इत्यादितः। प्रथम
प्रयोगे इत्यर्थः। न प्रतिप्रयोगं स आश्विनो देवता यस्य त्याश्विनं धूम्रललामं धूम्रलोहितवर्णं। छागं लं छागं पशुं इत्यालभेत। द्रव्यदेवतो
पदेशात् आश्विनपशुयागः कर्तव्य इति चोदना। तत्र लक्षणमाह। वेद इति। स्पष्टे। लक्षणांतरमाप्याह। पुनर्भूरिति। पुनर्भूतनयः पौनर्भवः

अग्नीषोमीयपशुना सवनीयेन वाप्ययं पशुः समानतंत्रत्वादिति बौधायनाशयः २० पृथक्तंत्रत्वपक्षेऽपि सोमात्पूर्वमनंतरं
ऐन्द्राग्नो यं विधातव्य इत्यन्ये तु व्यवस्थिताः २१ योसौ दुर्ब्राह्मणः सोमं पिपासति स आदितः। आलभेताश्विनं धूम्रललामं छाग
लं पशुं २२ वेदो वेदश्च विच्छिन्नौ यस्य त्रिपुरुषं दुर्ब्राह्मणः स विज्ञेयः पुनर्भूतनयोऽपि च २३ न सोमं पीतवान् यस्य पिता
वा पितामहः। दुर्ब्राह्मणः समाचष्टे कर्कः प्रारंभांतरं कृते २४ स्वमंगीकरोत्येनमेत्र ब्राह्मणभाष्यकृत् पक्षे स्मिन्नाश्
विनैन्द्राग्नौ पशू एककनिमित्तकौ २५ तथाप्यदृष्टकार्यत्वान्न योरिह समुच्चयः। एकस्य सोमविच्छेदे केचिदैन्द्राग्नमब्रुवन्
२६ [illegible] विधोपि दुर्ब्राह्मणाश्विनपशुयागं कृत्वा सोमं कुर्वीत। पर्वोक्तेः ऐन्द्राग्नस्त्रिपुरुषसोमपी × श्री सरस्वतीजी ः॥

पुनः भूलक्षणांडमयवि पित्वं निरासार्थं द्वितीयादौ ब्राह्मणाथ निरसनार्थ इति निमित्तभेदान्नैमित्तिकभेदः यथोक्तं निमित्तभेद इति त
त्र पूर्वपक्षयति निवृत्ति। द्विपुरुषा सोमपीथित्वमपि दो ब्राह्मणप्रयोजकमिति भावः। अत्रार्थं सम्मतिं दर्शयति। पक्षमिति। एतोकर्को कृप
क्षं मेत्र ब्राह्मणभाष्यरामा हारः॥ पूर्वपक्षमुपसंहरति। पक्ष इति निमित्तभेदाभावादेकमेव नैमित्तिकं स्यादिति। सिद्धांतमाह। तथापीति। अद
ष्टार्थानां समुच्चयः इति न्यायात्। न दुक्तं कात्यायनः। नौमांसापांप्राप्ता पश्चिते षुदोषनासादित्यादि। एकदेशीमतमाह। एकस्येति। एकस्य पितुः पिता
महस्य वा सोमपीथत्वे ऐन्द्राग्न एव एकः पशुर्भवतीति त्रिपाराणां पित्रादीनां अविच्छेदेन सोमपीथत्वे तु पशुद्वयं भवतीति केषांचिन्मतं॥ ८०

